শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

চোলসিংহপুরং দোড্ডযাচার্য কৃতং

# ॥ শ্রী দেৱরাজপঞ্চকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী দেৱরাজপঞ্চকম্ ॥

প্রত্যূষে ৱরদঃ প্রসন্নৱদনঃ প্রাপ্তাভিমুখ্যান্ জনান্
আবদ্ধাঞ্জলিমস্তকানৱিরলানাবালমানন্দযন্।
মন্দোড্ডাযিতচামরো মণিমযশ্বেতাতপত্রশ্শনৈঃ
অন্তর্গোপুরমাৱিরাস ভগৱানারূঢপক্ষীশ্বরঃ ॥ **1** ॥

মুক্তাতপত্রযুগলোভযচামরান্তঃ
ৱিদ্যোতমানৱিনতাতনযাধিরূঢম্।
ভক্তাভযপ্রদকরাম্বুজমম্বুজাক্ষং
নিত্যং নমামি ৱরদং রমণীযৱেষম্ ॥ **2** ॥

কেচিত্তৎৱৱিশোধনে পশুপতৌ
পারম্যমাহুঃ পরে
ৱ্যাজহ্রুঃ কমলাসনে নযৱিদা -
মন্যে হরৌ সাদরম্।
ইত্যেৱং চলচেতসাং করধৃতাং
পাদারৱিন্দং হরেঃ
তত্ত্বং দর্শযতীৱ সংপ্রতি নৃণাং
তার্ক্ষ্যঃ শ্রুতীনাং নিধিঃ ॥ **3** ॥

যদ্বেদমৌলিগণৱেদ্যমৱেদ্যমন্যৈঃ
যদ্ব্রহ্মরুদ্রসুরনাযকমৌলিৱন্দ্যম্।
তৎপদ্মনাভপদপদ্মমিদং মনুষ্যৈঃ
সেৱ্যং ভৱদ্ভিরিতি দর্শযতীৱ তার্ক্ষ্যঃ ॥ **4** ॥

প্রত্যগ্গোপুরসংমুখে দিনমুখে পক্ষীন্দ্রসংৱাহিতং
নৃত্যচ্চামরকোকরং নিরুপমচ্ছত্রদ্ৱযীভাসুরম্।
সানন্দং দ্বিজমণ্ডলং ৱিদধতং সন্নাহচিহ্নারৱৈঃ
কান্তং পুণ্যকৃতো ভজন্তি ৱরদং কাঞ্চ্যাং তৃতীযোৎসৱে॥ **5**॥

॥ ইতি শ্রী দেৱরাজপঞ্চকং সমাপ্তম্॥